**चतुर्थचरणम्, कार्यक्रमः 05**

**पञ्चदिवसीय-ऑनलाइन-राष्ट्रिय-कार्यशाला**

# संस्कृतवाङ्मये शैक्षिकदर्शनं मनोविज्ञानञ्च

**(Educational Philosophy & Psychology in Sanskrit Vangmay)**

20–24 जुलाई 2020 पर्यन्तम्

**संक्षिप्तप्रतिवेदनम्**

भारतसर्वकारस्य शिक्षामन्त्रालयस्य बहुआयामिपरियोजना-**पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शिक्षणाधिगमकेन्द्रेण** चतुर्थचरणस्य कार्यक्रमाणाम् **'संस्कृतवाङ्मये शैक्षिकदर्शनं मनोविज्ञानञ्च'** इति विषये पञ्चम-पञ्चदिवसीयराष्ट्रियकार्यशालायाः आयोजनम् 2021 तमवर्षस्य जुलाईमासस्य विंशतितमदिनाङ्कात् जुलाईमासस्य चतुर्विंशतितमदिनाङ्कं यावत् कृतम्। कार्यशालायाः मुख्योद्देश्यं प्रतिभागिनां संस्कृतवाङ्मये शैक्षिकदर्शनं मनोविज्ञानञ्च इत्यस्य मूलभूतसम्प्रत्ययानाम् अभिज्ञानं तथा च तेषां विश्लेषणं करणीयम् आसीत्। अनेन साकं शैक्षिकदर्शने मनोविज्ञाने च आधुनिके भारतीयपरिप्रेक्ष्ये ज्ञानात्मकैकीकरणस्य सन्दर्भे अन्तर्दृष्टिविकासः तेषां शिक्षणाधिगमप्रणालीनाम् अर्थपूर्णानुप्रयोगः शिक्षणशास्त्रं, आकलनम्, अनुसन्धानम्, शैक्षिकविचाराणां प्रासङ्गिकता च। ऑनलाइनकार्यशालायाः सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्रस्य शुभारम्भः शिक्षणाधिगमकेन्द्रस्य परियोजनाध्यक्षया **प्रो. अमितापाण्डेयभारद्वाजमहोदयया** स्वागतभाषणं कार्यशालायाः सन्दर्भैः च कृतम्। तदनु **प्रो. वी. मुरलीधरशर्ममहोदयानां** (कुलपतिः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः) मुख्यातिथीनां सम्बोधनम् अध्यक्षीयभाषणम् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालस्य माननीयानां कुलपतीनां **प्रो. रमेशकुमारपाण्डेयवर्याणां** च जातम्। **प्रो. के. भरतभूषणवर्येण** (सङ्कायप्रमुखः विभागाध्यक्षश्च) धन्यवादज्ञापनेन सत्रं सम्पन्नम्। कार्यशालायाः क्रियान्वयनं विशेषरूपेण अभिकल्पितेषु **पञ्चविंशत्यां** सत्रेषु कृतम्, तेषु उद्घाटन-प्रबोधन-चतुर्दशप्रदर्शनाधारिततकनीकीप्रश्नोत्तरसत्राणि, पञ्चस्वाध्यास-ऑनलाइनमाकलन-प्रतिपुष्टि-अनुभवकथनसमापनादीनि सत्राणि च जातानि। अन्तिमतिथिपर्यन्तं 481 प्रतिभागिनां पञ्जीकरणं प्राप्तम्, तेषु 352 कार्यशालायाम् आमन्त्रिताः, तथैव 266 प्रतिभागिभिः स्वीयं प्रतिभागस्य प्रतिपुष्टिः प्रदत्ता, परञ्च 209 प्रतिभागिभिः कार्यशाला सम्पूरिता, 57 प्रतिभागिनः व्यक्तिगतकारणेन अनुपस्थिताः आसन्। 209 प्रतिभागिषु भारतस्य 22 राज्येभ्यः 162 प्रतिभागिनः 03 केन्द्रशासितप्रदेशेभ्यः 47 प्रतिभागिनः च आसन्। 22 राज्येभ्यः प्रतिभागिनाम् आन्ध्रप्रदेशतः 14, आसामतः 04, बिहारतः 09, छत्तीसगढ़तः 01, गोवातः 02, गुजराततः 01, हरियाणातः 15, हिमाचलप्रदेशतः 04, झारखण्डतः 02, कर्नाटकतः 6, केरलतः 02, मध्यप्रदेशतः 06, महाराष्ट्रतः 26, उड़ीशातः 04, पंजाबतः 03, राजस्थानतः 14, तमिलनाडुतः 17, त्रिपुरातः 03, उत्तराखण्डतः 03, उत्तरप्रदेशतः 17, पश्चिमबंगालतः 05 तथा च 03 केन्द्रशासितप्रदेशे जम्मूकश्मीरतः 01, चण्डीगढ़तः 01, देहलीतः 45, प्रतिभागिनः च आसन्। कार्यशालाविषये निष्णातानां देशस्य प्रतिष्ठितसंस्थानानां **दशविशेषज्ञानां** कुशलमार्गदर्शनं जातम्। एतेषु सत्रेषु कार्यशालायाः मुख्यविषयाः आसन् ते यथा- संस्कृतवाङ्मये शैक्षिकदर्शनं मनोविज्ञानस्य आधारः, भारतीयदर्शने ज्ञानमीमांसा, संज्ञानात्मकता तेषां शिक्षणशास्त्रीयनिहितार्थः च, भारतीयपरिप्रेक्ष्ये संवेगात्मक-आध्यात्मिकबुद्धिः, ततानप्रबन्धनं मूल्याधारितशिक्षाश्च, व्यक्तित्वपरिप्रेक्ष्यं च, वैदिका प्राचीनशिक्षाप्रणाली च, न्यायबौद्धदर्शनं तेषां शैक्षिकप्रासङ्गिकता च। तकनीकीसत्राणां विषयेषु 12 दत्तकार्याणि प्रतिभागिभ्यः प्रदत्तानि। ऑनलाइनपरीक्षणम् अपि प्रशासितम्, तेषु 45% प्रतिभागिनः 60 **प्रतिशतात्** अधिकान् अङ्कान् लब्धवन्तः। अन्ते विशेषज्ञानां प्रस्तुतव्याख्यानानां गुणवत्ताविषये ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु कृता। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकं** च प्राप्तम्। तथा च तेषां औसतम् 77% 19% 03% एवं 01% क्रमशः श्रेणीषु प्राप्तम्। अनेन साकं कार्यशालायाः सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्ता। यथा- उत्कृष्टम्, **अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं** च। एतेषां 10 बिन्दूनां प्राप्तश्रेण्याम् औसतप्रतिशते 75% **उत्कृष्टम्,** 21% **अति-उत्तमम्,** 04% **उत्तमम्,** 00% **संतोषजनकं** च प्राप्तम्। समापनसत्रे परियोजनाध्यक्षया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तदनु माननीयानां **श्रीमताम् अतुलकोठारीमहोदयानां** (राष्ट्रियसचिवः, शिक्षासंस्कृतिः उत्थानन्यासः, नवदेहली) मुख्यातिथीनां सम्बोधनम्, अध्यक्षीयभाषणं माननीयानां **प्रो. रमेशकुमारपाण्डेयवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली) च जातम्। शिक्षासङ्कायप्रमुखस्य धन्यवादज्ञापनेन कार्यशाला सम्पन्नतां गता। कार्यशालायाः समापनतानन्तरं सफलप्रतिभागिभ्यः ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।